टेः। (१६८/१७८६)

भस्य[1] टेर्लोपो भवति इष्ठेमेयस्सु परतः। पटु – पटिष्ठः। पटिमा। पटीयान्। लघु – लघिष्ठः। लघिमा। लघीयान्।

[८१३] णाविष्ठवत् प्रातिपदिकस्य कार्यं भवतीति वक्तव्यम्। (म.भा. ३.२३०)

किं प्रयोजनम्? पुंवद्भावरभावटिलोपयणादिपरार्थम्। पुंवद्भावः – एनीमाचष्टे एतयति। [2]श्येतयति। 'तसिलादिष्वाकृत्वसुचः' (६.३.३५/८३६) इति इष्ठे पुंवद्भावः उक्तः। [3]रभावः – पृथुमाचष्टे प्रथयति। म्रदयति। टिलोपः – पटुमाचष्टे पटयति। [4]लघयति। यणादिपरम् – स्थूलमाचष्टे स्थवयति[5]।

भारद्वाजीयास्तु पठन्ति, 'णाविष्ठवत् प्रातिपदिकस्य पुंवद्भावरभावटिलोपयणादिपरविन्मतोर्लुक्[6]कनर्थम्' इति। स्रग्विणमाचष्टे स्रजयति। वसुमन्तमाचष्टे वसयति[7]। युवानमाचष्टे यवयति। कनयति। एतदुभयमपि उदाहरणमात्रम्, न परिगणनम्। प्रादयोऽपि ह्यीष्यन्ते, प्रियमाचष्टे प्रापयति[8]॥

स्थूलदूरयुवह्रस्वक्षिप्रक्षुद्राणां यणादिपरं पूर्वस्य च गुणः। (१६६/२०१८)

[9]स्थूल [10]दूर युव ह्रस्व क्षिप्र क्षुद्र इत्येतेषां [11]यणादिपरं लुप्यते इष्ठेमेयस्सु परतः, पूर्वस्य च गुणो भवति। स्थूल – स्थविष्ठः। स्थवीयान्। दूर – दविष्ठः। दवीयान्। युवन् – यविष्ठः। यवीयान। [12]ह्रस्व – ह्रसिष्ठः। ह्रसिमा। ह्रसीयान्। क्षिप्र – क्षेपिष्ठः। क्षेपिमा। क्षेपीयान्। क्षुद्र – क्षोदिष्ठः। क्षोदिमा। क्षोदीयान्। ह्रस्वक्षिप्रक्षुद्रशब्दाः पृथ्वादिषु पठ्यन्ते। परग्रहणं किम्? यविष्ठः, यवीयान्, ह्रसिष्ठः, ह्रसीयान् [13]इत्यत्र पूर्वस्य यणादेर्लोपो मा भूत्[14]। पूर्वग्रहणं विस्पष्टार्थम्[15]॥

प्रियस्थिरस्फिरोरुबहुलगुरुवृद्धतृप्रदीर्घवृन्दारकाणां प्रस्थस्फवर्बंहिगर्वर्षित्रब्द्राघिवृन्दाः।
(१६७/२०१६)

[16]प्रिय स्थिर स्फिर उरु बहुल गुरु वृद्ध तृप्र दीर्घ वृन्दारक इत्येतेषां [17]प्र स्थ स्फ वर् बंहि गर् वर्षि त्रप् द्राघि वृन्द इत्येते यथासङ्ख्यमादेशा भवन्ति इष्ठेमेयस्सु परतः। प्रिय – प्रेष्ठः। प्रेमा। प्रेयान्। स्थिर– स्थेष्ठः[18]। स्थेयान्। स्फिर – स्फेष्ठः। स्फेयान्। उरु – वरिष्ठः। [19]वरिमा। वरीयान्। बहुल – बंहिष्ठः। बंहिमा। बंहीयान्। गुरु – गरिष्ठः। गरिमा। गरीयान्। वृद्ध – वर्षिष्ठः। वर्षीयान्। तृप्र – त्रपिष्ठः। त्रपीयान्। दीर्घ – द्राघिष्ठः। द्राघिमा। द्राघीयान्। वृन्दारक – वृन्दिष्ठः। वृन्दीयान्। प्रियोरुगुरुबहुलदीर्घाः पृथ्वादिषु पठ्यन्ते, तेनान्येषामिमनिज् न भवति इति नोदाह्रियते॥

---

1. अङ्गस्य इत्यधिकम् फ. 2. श्येनीमाचष्टे इत्यधिकम् फ.ह. 3. रभावः नास्ति ब. 4. घटयति ह. 5. दवयति इत्यधिकम् फ.ह.इ. 6. कन्विध्यर्थमिति ह. 7. स्थानिवद्भावात् न वृद्धिः इत्यधिकम् फ. ह. 8. स्थिरमाचष्टे स्थापयति इत्यधिकम् क.ह. 9. इष्ठेमेयस्सु इति वर्तते इत्यधिकम् ह. 10. स्थूलादीनां परम् फ. 11. यणादि फ. 12. ह्रस्व-क्षोदीयान् नास्ति क. 13. अत्र नास्ति ह. 14. इति इत्यधिकम् ह. 15. ये इह गुणवचनास्तेषामत्रैव ज्ञापकादजादिप्रत्ययौ भवतः इत्यधिकम् ह. 16. प्रियादीनां स्थाने फ. 17. प्रस्थेत्यादयः फ. 18. स्थेमा इत्यधिकम् फ. 19. नास्ति फ.